संस्कृतभाषा देशीयोद्ग्रथनं च

Dr.A.R. Anilkumar,
Assistant Professor, Sree KeralaVarma College, Trissur.

भारतराष्ट्रस्य चरित्रं प्रगतिं च विवेचयितुं तुलयितुं च केवलं पाश्चात्यस्वत्वयुक्तय अपर्याप्तभूताः वर्तन्ते। भारतीयदेशीयताम् उद्दिश्य पठने अभारतीयं कञ्चित् सङ्कल्पमपि आश्रयितुं न प्रकल्पते। आधुनिकव्यवहारे भागभाग्भूतदेशस्य नेषन् इति व्यवहारचिन्तायाः प्रागेव भारतम् इति राष्ट्रस्य याथार्थ्यम् आसीत्। राष्ट्रम् इत्यस्य विवक्षितं तावत् प्रत्येकं व्यक्तेः विकासमार्गे स्वाभाविकरूपेण वर्तमानसामाजिकसत्तैव भवति इत्येतदेवात्र निदर्शनम्। व्यक्तेः गार्हस्थ्यजीवितात् प्रभृति तस्य सार्वलौकिकावस्था-प्राप्तिपर्यन्तं वर्तमानक्रमिकविकासस्य सत्तैवेयमिति निश्चिनुमः। व्यक्तेः पितरौ कलत्रपुत्रादयः इत्यादीनां समवाय एव कुटुम्बः।

कुटुम्बेन तेन व्यक्तिः जीवितसुखमनुभूयते। कुटुम्बजीवितं तु प्रगतये न, तु विनाशाय प्रयोजकीभूतम्। कारणेनैव तेन भारतसंस्कारमनुसृत्य प्रत्येकं व्यक्तिः तस्य व्यक्तित्वं संरक्ष्य कुटुम्बरूपेण विकासोन्मुक्तः सञ्जायते। कुटुम्बं तावत् तस्य प्रौढिं नूत्नीकृत्य विकसत् ग्रामरूपेण परिणमत् वर्तते। ग्रामः देशरूपेण परिणमन् तस्य स्वत्वं संरक्षन् सार्वत्रिकदेशरूपेण अर्थात् राष्ट्ररूपेण विकासं प्राप्तः सन् राजते।[१]

राष्ट्रस्य सङ्कल्प एतादृक् भवतीत्यतः अत्र राष्ट्रियसंघर्षस्य युद्धस्य च न कोऽप्यवकाशः किन्तु लक्ष्यं तावत् परमोदारा मानवप्रगतिरेव। 'आ नो भद्राः क्रतवो यन्तु विश्वतः' (यस्मात्कस्मादपि शुभचिन्ताः विश्वमिदं प्रवहन्तु) इति उत्कृष्ट विकार एव विराजते भारतसंस्कारे सर्वत्र। भारतसंस्कारस्य उदयादेव विराजमानः भवत्ययं विकारः, तस्य आविष्कर्तारः क्रान्तदर्शिनः महर्षयः भवन्ति। क्रान्तदर्शिनः सर्वसङ्गपरित्यागिनः आत्मसाक्षात्कारा-नुभवभूतसम्पदः स्वामिनः महर्षय एव अस्य उत्कृष्टविकारस्य बीजवापिनः, बीजं निक्षिप्य तस्यापि ऊर्जं दत्वा परिपोषकत्वेन च वर्तमानाः। तेषां लक्ष्यं तु न किमपि धनसम्पादनं किन्तु राष्ट्रस्य समग्रोन्नतिरेव।

प्रगतये साक्षिभूता प्रयतिता भवतीयं ऋषीश्वरपरम्परा। अत एव चरित्रातीतकालतः अध्यात्मविद्यायाः देशत्वेन प्रकाशं विन्यस्तुं भवत्यार्जितशक्ति भारतम्। भां भासं वा प्रति रतिः यत्र, प्रकाशं प्रति अभिनिवेशः यत्र, आत्मविद्यां प्रति आभिमुख्यं यत्र, भगवन्तं प्रति साक्षात्काररूपेण एकत्वभावः यत्र इत्याद्यर्थेषु भारतशब्दस्य प्रयोगः वर्तते।

'पराञ्चि खानि व्यतृणत् स्वयंभूः'[२] इति कठोपनिषद्वाक्येन ज्ञायते यत् विषयोन्मुखभूतमिन्द्रियमित्यतः साक्षात्तत्त्वं ज्ञातुं तानि न प्रभवन्ति। तत्त्वं ज्ञातुं बुद्धिमान् धीरः अन्तर्मुखः सन् गच्छति। 'आवृत्तचक्षुरमृतत्वमिच्छन्'[३] इति अत्र प्रमाणम्। अयमेव भारतीयस्य स्वभावः।

लोके अतिप्राचीनग्रन्थरूपेण प्रसिद्धः भवति वेदः। वेदास्तावदपौरुषेयाः इति प्रायेण सर्वाणि दर्शनानि अङ्गीकुर्वन्ति। मन्त्रद्रष्टारः ऋषयः तान् वेदान् अक्षरत्वेन आवहन्ति। पाश्चात्यपौरस्त्यतत्त्वचिन्तां समग्रतया कलयतः ऋषेरविन्दस्य अभिप्राये भारतभुवः ऋषीश्वाराः भारतस्य सांस्कारिक-आत्मीयैक्याय कृतप्रयत्नाः आसन्, तद्वत् तस्याः जनतायाः स्वातन्त्र्यं तस्मादेव वेदात् लब्धमिति। (The vedic rṣis and their successors made it their chief work to find a spiritual basis of Indian life and to effect the spiritual and cultural unity of the many races and peoples of the peninsula.. .. .. and evolved therefore the ideal of Cakravartins, a uniting imperial rule, uniting without destroying the autonomy of India's many kingdoms and peoples from the sea to sea.[4]

मानवराशेः आदिमग्रन्थत्वेन विख्यातस्य ऋग्वेदस्य ब्राह्मणे ऐतरेये राष्ट्रस्य व्यक्तं निर्वचनमस्ति। 'पृथिव्या समुद्रपर्यन्तायाः एकराट्'[५] इति राष्ट्रस्य तावत् प्रथमं निर्वचनमप्येतदस्ति। तत्र राष्ट्रे भागभाक्त्वेन वर्तमानाः साम्राज्य-भौज्य-स्वराज्य-वैराज्य-परमेष्ट्यादयः च ऋषिणा परामृष्टाः। सङ्कल्प एषः विख्यातेन पूर्वकालचरित्रपण्डितेन राधाकुमुद् मुखर्जी महाभागेन भारतस्य ऐक्यम् इत्यस्मिन् प्रबन्धे एवं निर्णीतः यः 'सम्पूर्णशासने प्रकृतिदत्तमर्यादायुक्तं एकं साम्राज्यम् आवश्यकम्। एकस्मात् पार्श्वात् अपरपार्श्वा यावत् अविच्छिन्ना अनुस्यूतिः भूयात्। समुद्रात् समुद्रं यावत् व्याप्तं भूप्रदेशे एकं शासनं आवश्यकं, एका भरणप्रणाली चावश्यकी।' इति। (Monarchy at its highest should have an empire extending right upto natural boundaries. It should be territorially

all embracing, upto the very ends uninterrupted and should constitute and establish one state and administration in the land upto the sea's.)

मातृभूमिमुद्दिश्य सजीवः कश्चन सङ्कल्पः ऋग्वेदे वर्तते-

ते अज्येष्ठा अकनिष्ठास उद्भिदोऽमध्यमासो महसा वि वावृधुः
सुजाता सो जनुषा पृथ्वीमातरो
देवा मर्त्या आ नो अच्छा जिगतनु।[६]
अज्येष्ठासो अकनिष्ठास एतो
सम्भ्रातरो वावृधुः सौभगाय।[७]

'अत्र भूमिं मातृत्वेन पश्यन् पुरुषः कुलीनः। तस्मात् श्रेष्ठः न कश्चन विद्यते भूमौ। तस्मान्मध्यमः अपि न कश्चन। सर्वेषां तेषां स्थानं तावत् समानम्। स्वं प्रति आगतम् आपदं स्वयमेव नाशयित्वा उद्धारः कुर्वन् वर्तते सर्वदा। सर्वेषां चिन्ता तावत् समाना। यतस्ते सर्वे भ्रातरः। प्रयत्नेन सर्वेषां सौभाग्यं तावत् इकीभूय वर्तते च।'

अपि च मातृभूमिः, मातृसंस्कृतिः, मातृभाषा तास्तावत् सौख्यप्रदायिन्यः देवताः, अन्तःकरणे तास्सर्वेषां भूयासुः इति ऋग्वेदे ' वर्तते। अथर्ववेदे च 'माता भूमिः पुत्रोऽहं पृथिव्याः' इति सर्वेषां पोषकेत्यतः भूमिर्माता प्रजा तावत् तस्याः पुत्र इति च घोषितो दृश्यते।

भद्रमिच्छन्त ऋषयः स्वर्विदस्तपो
दीक्षामुपनिषेदुरग्रे।
ततो राष्ट्रं बलमोजश्च जातं
तदस्मै देवो उपासं नमन्तु।[९]

इत्यत्र ऋषीश्वराः सर्वे सर्वेषां भद्रम् इच्छन्ति। तदर्थं ते दीक्षां तेनुः। तस्मात् राष्ट्रं बलं ओजश्च सम्भूतम्। तस्मात्सर्वे एकीभूय तिष्ठन्तु इत्येव प्रार्थयन्ति।

संस्कारस्य आधारः

धारणात् धर्म इत्याहुः, विश्वं धारयति इति धर्मः इति बहु निर्वचनं सर्वत्रास्ति। महाभारतस्य शान्तिपर्वणि-

न वै राज्यं न राजासीत्
न च दण्डो न दाण्डिकः।
धर्मेणैव प्रजास्सर्वाः

रक्षन्ति स्म परस्परम्।। इति धर्मस्य विचारः भीष्मेण कृतः। "It is the right law of functioning of our life in all its parts" इति अरविन्दमहर्षिणा धर्मस्य सुव्यक्तं निर्वचनं दत्तम्। भारतीयाः सर्वे महापुरुषाः धर्मस्य प्रवक्तारः आसन्। गान्धिनः 'मा मा हिंसीः' इति अहिंसारूपधर्मस्य प्रवक्तारः अभवन्। श्रीरामकृष्णपरमहंसः, श्रीविवेकानन्दः, चट्टम्पिस्वामिनः, ब्रह्मानन्दः इत्येते महर्षितुल्याः महान्तः धर्मस्यैव प्रचारं कुर्वन्तः भारतस्य जनततीनामौन्नत्याय आध्यात्मिकस्तरे स्वीयजन्मनः सार्थकतासिद्धौ कृतप्रयत्नाः दरीदृश्यन्ते। भौतिकवस्तुताः अपि आध्यात्मिकरूपेण मोक्षरूपपरमपुरुषार्थसिद्धये स्वीकुर्वन्तः आसन् भारतीयाः आचार्याः। इतरेषां सुखाय स्वमनस्तृप्तये च ते कारुणिकाः प्रायतन्त।

धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण।

धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः।। इति अतुला चिन्ता भारतस्यैव देशीयोद्ग्रथनस्य आधारशिलात्वेन वर्तते।

राष्ट्रस्य अनुस्यूतिः

वेदोपजीव्यरामायणादिषु राष्ट्रसङ्कल्पः सुव्यक्तं प्रपञ्चितः। भारतवर्षं इति नाम्ना इन्ड्यामहाराज्यं प्रसिद्धमवर्तत। आदिकविर्वाल्मीकिः आदर्शपुरुषं श्रीरामं –

'समुद्र इव गाम्भीर्ये धैर्ये च हिमवानिव।' इति अवर्णयत्। अत्र हिमवत आरभ्य समुद्रं यावत् न्यस्तः भूप्रदेशः श्रीरामस्य धर्माधिष्ठितदेश आसीदिति व्यनक्ति। भारतस्य मध्यदेशत्वेन विराजमानकिष्किन्धायां स्थीयमानश्रीरामः वाल्मीकिना -

'इक्ष्वाकूणामियं भूमिः सशैलवनकानना' इति प्रचोदितः।

आरण्यकाण्डे अप्रियपथ्यवचने मारीचस्य रावणं प्रत्युपदेशे-

'तद्विधः कामवृत्तोऽपि
दुःशीलः पापमाश्रितः।
आत्मानं स्वजनं राष्ट्रं
स राजा हन्ति दुर्मतिः।।' इति दृश्यते। राजा धर्मिष्ठः भूयात्। नो चेत् आत्मानं स्वजनं राष्ट्रं च कुमति स राजा हन्ति इति अत्र सूच्यते।

'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' इति निर्देशः अपि भारतस्य स्वत्वभूतः। इदं वचः भारतीयं कमपि राष्ट्रसद्भावनाय प्रेरयति सर्वदा।

'गङ्गे च यमुने चैव गोदावरि सरस्वति।

नर्मदे सिन्धु कावेरी जलेऽस्मिन् सन्निधिं कुरु।।' इति व्यासस्य प्रार्थनया समस्तभारतवर्तिन्यः पुण्याः नद्यः भारतभुवः स्वत्वभूताः सर्वदा समाद्रियमाणाः सर्वैः इति घोष्यते। तद्वत्-

'महेन्द्रो मलयः सह्यो शक्तिमानुषपर्वतः।

विन्ध्यश्च पारियात्राश्च सप्तैते कुलपर्वताः।।' इत्यपि व्यासनिर्देशः भारतीयपर्वतानां पुण्यानां महिमानं पोषयति।

'अत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने।

यतो हि धर्मभूरेषा यतोऽन्यो भोगभूमयः।।द्यश्च इति व्यासनिर्देशः 'एष्याभूखण्डे भारतस्यैव महत् स्थानं यतो हि एषा धर्मभूमिः' इत्येतत् घोषयति।

'गायन्ति देवाः किल गीतकानि

धन्यास्तु ते भारतभूविभागे।

स्वर्गापवर्गास्पदमार्गभूते

भवन्ति भूयः पुरुषाः सुरत्वात्।।' इति विष्णुपुराणवचनं देवलोके केवलं स्वर्ग एवास्ति, मोक्षस्य स्थानं तत्र नास्ति, किन्तु भारतवर्षं स्वर्गाय मोक्षाय च पर्याप्तम् अतः अत्र यस्य जनिः स देवादपि श्रेष्ठः इति सूचयति।

रघुवंशकुमारसंभवादिकाव्यानि सर्वाण्यपि एतद्धर्मस्य परिपाकतां द्रढीकुर्वन्ति। भारतीयचिन्तासरणिरेषा धर्मस्य प्रोद्भासका इत्यतः समस्ता देशीयबोधस्य तद्वारा देशीयोद्ग्रथनस्य च उद्धारका वर्तते।

संस्कृतम् इति सम्पत्

भारतीयाः आधिकारिकाः सर्वे ग्रन्थाः संस्कृतभाषायां लिखिताः। वेदाः, उपनिषदः, इतिहासाः, पुराणानि, शास्त्राणि, काव्यनाटकानि च अत्रान्तर्भवन्ति। भारतराष्ट्रस्य तथा संस्कारस्य च प्रभावः एतेषां ग्रन्थानां प्रभावेन द्विगुणीकृतः। अर्थात् एते ग्रन्थाः भारतसंस्कारस्य शक्तिशिलाः। एकभारतसङ्कल्पस्य संरक्षकत्वेन वर्तमाना प्रथमा प्रधाना च भवति संस्कृतभाषा। आदिमग्रन्थत्वेन वर्तमानस्य वेदस्य भाषा संस्कृतभाषा इत्यतः सा भाषा देवभाषेति प्रथते। रामायणकाले व्यवहारभाषा, महाभारतकाले राजकीयभाषा, कालिदासादीनां काले वरेण्यभाषा इत्यनेन वर्तमाना संस्कृतभाषा अधुना मृतभाषा इति वदन्ति विमर्शकाः। भरणवर्गस्य विगणनाम्

उल्लङ्घ्य दीर्घकालात् स्थायित्वेन वर्तमानं संस्कृतम् अधुना व्यवहारभाषात्वेन तद्वत् साङ्केतिकविद्यायाः अनुरूपभाषात्वेन च प्रगतिं प्राप्य वर्तते। भाषायाः अन्यादृशवैशिष्ट्यं प्रगत्याऽनयोद्घोष्यते।

रामायणमहाभारतयोरितिहासयोः प्रभावः भरतस्य समस्तेषु क्षेत्रेषु वर्तते। मृतभाषात्वेन कथितसंस्कृतभाषायां लिखितयोरेतयोरितिहासयोः कथामुपजीव्यैव भारतेषु प्राचीनकालादारभ्य प्रादेशिकभाषासाहित्यानि तज्जनितसंस्काराणि च लब्धजन्मानि। वाल्मीकिव्यासकालिदासप्रभृतयः सहृदयाः महान्तः ग्रन्थकर्तारः समस्तभाषामातृत्वेन विराजमानसंस्कृतभाषायां ग्रन्थं कृतवन्त इत्यत एव स्यात् तेषां समादरे प्राधान्यम्। सम्यक् कृतमिति अर्थात् भाषायाः पूर्णतां पाणिनिरचितव्याकरणेन परिपक्वतां प्राप्तायाः मृतभाषाव्यवहारः समीचीनः यतः मृतिस्तावत् पूर्णताप्राप्तौ वर्तते इत्येतत्। अनेके कविवराः प्रादेशिकभाषायाः सन्तः अपि व्यासवाल्मीकिकालिदासाः कविवरत्वेन सर्वेषां स्मृतिपथे वर्तन्ते। प्रादेशिकस्तरे वर्तमानाः संस्कृतपण्डिताः बहवः सन्ति। आनन्दवर्धनः, अभिनवगुप्तः, क्षेमेन्द्रः, अश्वघोषः इत्येते काश्मीरीयाः, जयदेवः बङ्गदेशीयः, श्रीशङ्कराचार्यः, शक्तिभद्रः, मेल्पुत्तूर् नारायणभट्टतिरिः, पि। सि। देवस्या, के। एन्। एषुत्तच्छन् इत्येते केरलीयाः च न केवलं प्रादेशिकभाषाकवयः अपि तु संस्कृतभाषाकवयः च। एते संस्कृतभाषाकवित्वेन प्रथन्ते न तु प्रादेशिककवित्वेन। अत्र संस्कृतस्य सार्वदेशीयप्रभावः दरीदृश्यते। प्रबलः प्रबुद्धश्च सार्वदेशीयबोधः प्राचीनकालादारभ्य भारते आसीत् तदर्थं संस्कृतभाषा एव माध्यमभूता इति विश्वसितुं निदर्शनमन्यन्नावश्यकम्। लोकभाषात्वेन प्रथितस्य आङ्गलस्य इंग्लण्ड् देशेऽपि बहुभेदः वर्तते। अपि च अमेरिकन् इंग्लीष्, इन्ड्यन् इंग्लीष् इति भेदोऽपि। किन्तु संस्कृतस्य लोके सर्वत्रापि एकमात्रप्रणाली वर्तते। आङ्गलवत् तादृशभेदः संस्कृतभाषायाः नास्ति।

श्रीशङ्कराचार्येण कृतं दौत्यमपि अत्र प्रातःस्मरणीयं वर्तते। भारते सर्वत्र सञ्चरता श्रीशङ्करेण तत्र तत्र विविधविषयेषु धर्मेषु च प्रसिद्धान् दार्शनिकमल्लान् वादे विजित्य स्वधर्मस्य अद्वैतस्य प्रचारं कर्तुं, संस्कृतभाषा एव माध्यमत्वेन स्वीकृतः। श्रीशङ्कराचार्यस्य प्रतिपक्षत्वेन प्रसिद्धबुद्धदर्शनस्य सर्वे ग्रन्थाः तादात्विकजननतेः भाषात्वेन प्रकल्पितप्राकृत एव आसन् इत्यतः संस्कृतभाषायास्तद्वत्प्रामाणिकता तेषां ग्रन्थानां नाभवत् इति उच्यते। किन्तु इदानीं अश्वघोषस्य बुद्धचरितं, हर्षस्य नागानन्दं

च संस्कृतभाषामाध्यमेन लिखितमित्यतः ग्रन्थतल्लजमेतद्विद्वन्मनोमुकुरायमानं वर्तते। स्वचिन्तादर्शने संस्कृतभाषया पोषिते शङ्करेणेत्येतत् अद्वैतदर्शनस्य प्रतिष्ठापकत्वेन श्रीशङ्करः तथा राष्ट्रस्य सम्पद्रूपेण श्रीशङ्करकृतयश्च आविर्भवन्ति इत्येतस्मिन् सर्वे दार्शनिकाः विद्वद्वराः ऐककण्ठ्यं भजन्ते।

संस्कृतभाषायाः महत्वं पश्यन्तः अनेके वैदेशिकाः अपि संस्कृतभाषां पठितुं श्रद्धालवः आसन्। सर् विल्यं जोण्स्, विन्टर् निट्स्, एच्. जि. वेल्स् माक्स् मुल्लर् प्रभृतयः वैदेशिकाः विद्वांसः तत्र प्रधानाः। संस्कृतभाषायाः पठनेनैव ते विद्वद्वराः भारतं तस्य संस्कारं च सभाजयितुं आरभन्त। भारतीयदर्शनानि, नियमशास्त्रं, व्याकरणं, वैद्यं, ज्योतिषं इत्यादीनि सर्वाणि शास्त्राणि संस्कृतभाषायां लिखितानीत्येतदपि विज्ञानजिज्ञासाकुतुकिनां वैदेशिकानां संस्कृतभाषापठनाय प्रेरकमभवदित्यत्र न काप्यतिशयोक्तिः।

लोकचरित्रकारः विन्सन्ट् स्मित् विविधदेशेन तुलनं कृत्वा वैशिष्ट्येन भारतस्य परामर्शमकरोत्-The civilization of India has many features which differentiate it from that of all other regions of the world, while they are common to the whole country or rather continent in a degree sufficient to justify its treatment as a unit in the history of human social, intellectual development.[10]

हान्स् कोहन् इति जर्मन् चरित्रकारः अपि भारतस्य सविशेषचैतन्यं दर्शयितुं सज्जः आसीत्। History of Nationalism in the East इति अस्य कृतौ –India with its three hundred million inhabitants constitutes a geographical unit with clearly defined boundaries. For many thousands of years, India has been one, not merely a geographical sense, but in religion, civilization and customs. She has always felt to be an integrated whole from the Himalayan heights to Ceylon. Her sentiment of unity has found expressions in ancient songs and traditions, it already existed at the time of the Rgveda and the rsis of those days knew that the land watered by India's many rivers were one. Her most important places of pilgrimage are scattered over the whole of the country and these have always been meeting places were men from all over India gathered together on the roads and in the woods, and where they learnt at the feet of their great teachers.

In a common intellectual heritage persisting through an unbroken tradition and moulding and permeating India's whole social life to the minutest detail, and in the peculiar contemplative piety which lies at the root of all the various forms of Hinduism. India has always been conscious of her oneness.[11] इति विशिष्टपरामर्शः भारतस्य ऐक्यस्य अखण्डतायाश्च निदानत्वेन घोषितः। अत्रस्थवेदादीनां पारम्पर्यं तथा भक्तिसाधनया आयत्तः एकात्मबोधश्च एतदर्थं सहायकौ आस्तामिति च तेन निर्दिष्टम्।

वस्तुताभिः आभिः राष्ट्रम् इतीदमस्माकम् अस्तित्वं तथा प्राचीनत्वं च सूचितम्। वैदिककालं यावत् प्राक्तनं लौकिककालं यावदधुनातनं धारावाहिकरूपेण स्थीयमानं भारतीयं सम्पत् महर्षिभिः राजभिः सहृदयैः कविवरैः दार्शनिकैः विमर्शकैः च आर्जितं समस्तं भारतस्य अखण्डाय एकात्मबोधप्रोज्वलनाय कारणभूतं भवति तद्वत् देशीयोद्ग्रथनस्य स्वभावरूपीकरणे सहायकं भवति संस्कृतभाषा च ग्रन्थग्रथने सूत्रवत् राजमानेत्यतः साऽपि सर्वांशसिनी भवति इत्येतस्मिन् न सन्देहलेशावकाशः।

Notes

१. हरि आर्, राष्ट्रवुं संस्कारवुम्, कुरुक्षेत्र प्रकाशन्, कोच्चि, २०१०, पृ. ५७.

२. कठोपनिषत्, २।१.

३. कठोपनिषत्, २।७.

४. Foundations of Indian Culture, p. 198.

५. ऐतरेयब्राह्मणम् ८।१५.

६. ऋग्वेदः ५।५९। सूक्तं ६.

७. ऋग्वेदः ५।६०। सूक्तं ५.

८. ऋग्वेदः १।१३।९.

९. अथर्ववेदः काण्डं १९, सूक्तं ४१, मन्त्रः १.

10. History of Indian Philiosophy, p. 346.

11. History of Nationalism in the East, p. 125. ò